# ब्रह्मप्रज्ञा {BrahmaPrajna}

*(A Multidisciplinary and Multilingual Peer-reviewed Journal)*

*Published by:* Vedanta Vibhag, Valmeeki Vidyapeeth,

Email: vedantavibhag@gmail.com.     ISSN: 2795-1960 (Print)


# ग्रहोदयास्तविमर्शः


**गणेशलम्सालः**

सिद्धान्तज्योतिषाचार्यः

Email: ganeshlam2054@gmail.com



**शोधसारांशः**

*सिद्धान्तज्योतिषशास्त्रे वर्णितेषु ग्रहगणितविषयेषु ग्रहोदयास्तविषयोऽन्यतमो वर्तते। ग्रहाणामुदयास्तं तावद्द्विविधं भवति। क्षितिजाभिप्रायेण सूर्यसन्निधिवशेन च ग्रहाणामुदयास्तं भवति। अत्र सूर्यसन्निधिवशेन कथं ग्रहाणामुदयास्तं भवतीत्यधीतमस्ति। किं नाम ग्रहोदयास्तम्? ग्रहोदयास्तसाधनविधिः कः? ग्रहोदयास्तसाधनस्य प्रयोजनं किम्? इति समस्या आधृत्य मधुकरपद्धत्या निगमनात्मकविधिना च शोधकार्यं विहितमस्ति। शोधकर्मणि पुस्तकालयात् सिद्धान्त-ज्योतिषविषयसम्बद्धा ग्रन्थाः सङ्कलिताः। सिद्धान्तज्योतिषग्रन्थान् आधृत्याध्ययनं विहितम्। तेजसां गोलकः सूर्यो-ऽस्ति। अन्येषां ग्रहपिण्डानां गोलकास्तु अम्बुगोलका इति प्राचीनैर्वर्णितं वर्तते। तेन सप्तग्रहेषु सूर्य एव स्वप्रकाशितो ग्रहो वर्तते। चन्द्रादिग्रहाः प्रकाशहीना वर्तन्ते। तेषामुपरि ये सूर्यरश्मयः पतन्ति ते ग्रहास्तान् प्रकाशान् अस्मान् प्रदर्शयन्ति। एतेनाकाशस्था ग्रहा यदाः सूर्यासन्ना भवन्ति ते सूर्यकिरणस्य प्रभावाददृश्या भवन्ति, तादृशी अवस्था एव सिद्धान्त-ज्योतिषशास्त्रे रविसन्निधिवशेन ग्रहाणामस्त इति कथितं वर्तते। कस्यापि ग्रहबिम्बस्य यैरंशैः सूर्यासन्नभावेन यदुदयास्तत्व-मुचितं भवति तस्य तादृशा अस्तोदयारम्भकालोद्भवा अंशा एव कालांशा इति कथिताः। सिद्धान्तज्योतिषग्रन्थेषु ग्रहाणां निम्नलिखिताः कलांशाः (सूर्यग्रहयोः कालवृत्तीया अंशाः) कथिता वर्तन्ते - चन्द्रादिग्रहाणां क्रमेण १२, १७, १४, ११, १०, १५ कालांशा भवन्ति। वक्रिणो बुधस्य तु १२, वक्रिणः शुक्रस्य ८ कालांशा भवन्ति। भूसूर्यकक्षयोर्मध्ये स्थिता ग्रहा आभ्यन्तराः। सूर्यकक्षातो बहिःस्था ग्रहा बाह्याः कथ्यन्ते। पृथ्वीतोऽतिदूरस्थितानां रविकक्षातोऽपि बाह्यानां भौमगुरु-शनीनामतिलघुबिम्बत्वादुच्चनीचस्थानयोरपि कालांशे भेदाभावमवलोकतया तेषामुदये अस्ते चैका एव कालांशाः पठिताः। पृथ्वीतो निकटस्थयोः, भूसूर्ययोराभ्यन्तरयोर्बुधशुक्रयोस्तु बिम्बयोर्विपुलतया तयोर्वक्रत्वे (नीचासन्ने) द्विहीनाः कालांशाः कथिताः। सूर्यसन्निधिवशेन ग्रहाणामुदयास्तदिग्ज्ञाने, ग्रहकालांशमानकथने प्राचीनाचार्याणां मतैक्यं दृश्यते। उदयास्तसाधनविधावपि समानता एवास्ति। अभीष्टकाले सूर्यग्रहयोः कालवृत्तीयान्तरांशं (इष्टकालांशं) विज्ञायानुपात-विधिना ग्रहोदयास्तयोः कालसाधनविधिः प्रतिपादितो वर्तते सिद्धान्तज्योतिषग्रन्थेषु। मुहूर्तशास्त्रे भौमबुधगुरुशुक्रशनिषु पञ्चताराग्रहेषु गुरुशुक्रयोरस्तसमयः कालाशुद्धिरिति कथितमस्ति। सन्ध्योपासनादिनित्यकर्माणि, कालानुरोधात् कथितानि नामकरणान्नप्राशनादिनैमित्तिककर्माणि कालाशुद्धावपि न निषिद्धानि। अन्यानि चूडोपनयनविवाहादिकाम्यकर्माणि तु कालाशुद्धौ निषेधितानि वर्तन्ते।*



**शब्दकुञ्जी :** कालांशाः, कालाशुद्धिः, गतैष्यदिनानि, ग्रहोदयास्तम्, वक्रिणः।

## विषयपरिचयः

गृह्णाति गतिविशेषान् इति ग्रहः। आकाशे ग्रहाः स्वस्वकक्षासु पूर्वाभिमुखगत्या पृथिवीमभितो भ्रमणं कुर्वन्ति। ग्रहकक्षासहितभमण्डलं प्रवहवायुः पश्चिमगत्या वेगेन भ्रामयति। प्रवहवायुना भ्रममाणासु स्वस्वकक्षासु ग्रहा यदा क्षितिजादुपरि आगच्छन्ति तदा तेषामुदयः। यदा क्षितिजादधोगता भवन्ति तदा तेषामस्त इति ग्रहाणां क्षितिजभेदेनोदयास्तम्। इत्थं ग्रहाणामुदयद्वयान्तर्वर्ती कालो हि तद्दिनसंज्ञो भवति। सूर्यदर्शनवशाद् अस्माकमहोरात्रं भवति। तेन सूर्योदयद्वयान्तर्वर्ती कालो हि भूसावनदिनम्। आकाशस्था ग्रहा यदाः सूर्यासन्ना भवन्ति ते सूर्यकिरणस्य प्रभावाद् अदृश्या भवन्ति, तादृशी अवस्था एव सिद्धान्तज्योतिषशास्त्रे रविसन्निधिवशेन ग्रहाणामस्तमिति कथितं वर्तते। एतादृशो ग्रहाणामस्तकालोऽशुभकाल इति मुहूर्तज्ञानां मतमस्ति। शुभमुहूर्त एव सम्पादितानि धार्मिककार्याणि संस्काराश्च शुभफलदायका भवन्ति।

## अध्ययनस्य समस्योद्देश्यञ्च

ग्रहोदयास्ताध्ययनमेवास्य शोधकार्यस्य समस्या वर्तते। अत्र निम्नलिखिताः समस्या निरूपिता वर्तन्ते–

क. किं नाम ग्रहोदयास्तम्?

ख. ग्रहोदयास्तसाधनविधिः कः?

ग. ग्रहोदयास्तसाधनस्य प्रयोजनं किम्?

ज्योतिषशास्त्रस्य सिद्धान्तस्कन्धे वर्णितग्रहोदयास्तयोर्लक्षणपूर्वकप्रयोजनस्याध्ययनमेवास्य शोधकार्यस्य प्रमुखोद्देश्यं वर्तते। निम्नलिखितानामुद्देश्यानां पूर्तयेऽयं शोधः कृतः।

क. ग्रहोदयास्तपरिचयः।

ख. ग्रहोदयास्तसाधनविधिः।

ग. ग्रहोदयास्तसाधनस्य प्रयोजनम्।

उल्लिखितानामुद्देश्यानां पूर्तिरेव शोधोद्देश्यं वर्तते।

## अध्ययनविधिः

अस्मिन् शोधकार्ये आवश्यकसामग्रीणां सङ्कलनं पुस्तकालयाद् विहितमस्ति। पुस्तकालये प्राप्यमाणा ज्योतिषशास्त्रस्य सैद्धान्तिकग्रन्थाः सामग्रीरूपा वर्तन्तेऽत्र। सङ्कलितानां सामग्रीणां मधुकरपद्धत्या निगमनात्मकविधिना च विश्लेषणं कृतमस्ति। तत्र व्याख्याविधिः, वर्णनात्मकविधिश्च प्रयुक्तोऽस्ति।

## शोधकार्यस्य सीमाङ्कनम्

स्थानदृष्ट्या अस्य शोधकार्यस्य पुस्तकालयाः, विषयदृष्ट्या सिद्धान्तज्योतिषविषयसम्बद्धा ग्रन्था इति क्षेत्रम्। एकस्मिन्नेव शोधकर्मणि सिद्धान्तज्योतिषशास्त्रसम्बद्धग्रन्थेषु वर्णितानां सर्वेषां ग्रहसम्बन्धिगतिस्थित्यादिविषयाणामध्ययनं नैव सम्भवम्। अतोऽस्मिन् शोधकार्ये सिद्धान्तज्योतिषशास्त्रे वर्णितविषयेषु ग्रहोदयास्तविषयस्यैवाध्ययनं विहितमस्ति।

अतः सिद्धान्तज्योतिषशास्त्रस्य साम्प्रतमुपब्धग्रन्थेषु वर्णितग्रहोदयास्तविषयस्याध्ययनमेवास्य शोधकार्यस्य सीमा वर्तते। अर्थाद् ग्रहोदयास्तविषयादन्यविषयाश्चास्य शोधकर्मणः सीमारूपेण वर्तन्ते।

## सैद्धान्तिकपर्याधारः

ज्योतिषशास्त्रस्य सिद्धान्तस्कन्धे खगोलीयविषयाणामध्ययनं भवति। तत्र सूर्यादिग्रहाणां गतिस्थित्यादीनामध्ययन-सन्दर्भे सूर्यसन्निधिवशाच्चन्द्रादिग्रहाणामुदयास्तकालसाधनं विधीयते। चन्द्रादिग्रहाः स्वप्रकाशाभावात् सूर्यकिरणैः प्रकाशिता भवन्ति। तेन यदा ते चन्द्रादिग्रहाः सूर्यनिकटस्था भवन्ति तदा भूस्थिता जनास्तान् चन्द्रादिग्रहान् दर्शयितुमसमर्था भवन्ति। सिद्धान्तज्योतिषग्रन्थेषु ग्रहोदयास्तकालस्य सूर्यग्रहयोरन्तरांशाः (नाडीवृत्तीयाः कालांशाः) पठिता वर्तन्ते। पठित-कालांशान् आधृत्य ग्रहाणामुदयास्तकालसाधनं विधीयते। उदयास्तकालसाधने गणितागता ग्रहा दृक्तुल्या भवनीयाः। ग्रहाणां दृक्तुल्यकरणाय दृक्कर्मसंस्कारस्यावश्यकता भवति। आयनाक्षभेदेन दृक्कर्म द्विविधं प्रोक्तमस्ति। तथा च चन्द्रादि-ग्रहाणामुदयास्तकालदिवसादिसाधने त्रैराशिकविधिरनुपातविधिर्वोपयुज्यते। अतः स्वकक्षायां स्वगत्या ग्रहभ्रमणम्, सूर्येतरग्रहाणां प्रकाशहीनत्वम्, कालांशाः, दृक्कर्मसंस्कारः, त्रैराशिकगणितमनुपातविधिर्वा ग्रहोदयास्तकालाध्ययनाय सैद्धान्तिकपर्याधाररूपेण वर्तन्ते।

## विषयप्रवेशः

### (क) ग्रहोदयास्तपरिचयः

ग्रहाणामुदयास्तं तावद् द्विविधं भवति। तत्र प्रथमं क्षितिजाभिप्रायेण ग्रहाणामुदयास्तं भवति। अपरं सूर्यसान्निध्य-वशेन ग्रहाणामुदयास्तं भवति। यदा ग्रहः क्षितिजादूर्ध्वगतो भवति तदा तस्य दिनम्। तेन पूर्वक्षितिजे प्राप्ते ग्रहे ग्रहोदयः। पश्चिमक्षितिजे प्राप्ते ग्रहे ग्रहास्तकालः। यदा ग्रहः क्षितिजादधो भवति तदा तस्य रात्रिः। सूर्यापेक्षया प्रकाशरहितानां ग्रहाणां सूर्यसान्निध्यात्तस्य प्रखरकिरणप्रभावेण यददर्शनं भवति तत्तेषामस्तमयत्वम्। एवमेव सूर्यादन्तरितानां ग्रहाणां तस्य प्रखरकिरणस्याल्पप्रभावेण यद्दर्शनं तत्तेषामुदयत्वम्। यदा ग्रहाः सूर्यात् स्वकालांशान्न्यूनकालांशे भवन्ति तदा तेषां सूर्यासन्नभावेनास्तो भवति। यदा च पुनः कालांशेभ्योऽधिकान्तरे भवन्ति तदा तेषां पुनरुद्गमनं भवति। अर्थात् सूर्यकिरणजनितदृष्टिदोषाद् ग्रहाणां बिम्बानि यदा वयं द्रष्टुं न पारयामस्तदा तेषां सूर्यासन्नभावेनास्तमनं भवति। यदा च ग्रहसूर्ययोरन्तरांशाः कालांशेभ्योऽधिकास्तदा सूर्यकिरणजनितदृष्टिदोषस्याल्पत्वाद् वयं पुनः ग्रहबिम्बं द्रष्टुं पारयामस्तेन तदा ग्रहाणां सूर्यासन्नभावेनोदयो भवति। यथोक्तञ्च सिद्धान्तशेखरग्रन्थे–

**प्राक् खेचरार्कविवरप्रभवैर्यतोंऽशैःपश्चात् सहस्रकिरणद्युचरान्तरस्थैः।**
**तिग्मांशुसन्निधिवशात् स्युरदृश्यदृश्यास्तस्माद् ब्रवीम्यथ तदानयनं स्फुटार्थम्॥**

(सिद्धान्तशेखरः, ग्रहोदयास्तमयाध्यायः, श्लो. १)

### (ख) ग्रहकालांशपरिचयः

पूर्वदिशि पश्चिमदिशि वा सूर्याद् यावानन्तरितो ग्रहो दृश्यतामदृश्यतां वा याति तावन्तस्तस्य कालांशाः। ते च प्रतीच्यां सूर्यास्तानन्तरं यावता कालेन ग्रहबिम्बमस्तक्षितिजं प्राप्नोति वा पूर्वस्यां ग्रहबिम्बोदयदर्शनाद् यावता कालेन सूर्य उदेति तत्कालस्य येंऽशास्ते तस्य ग्रहस्य कालांशाः कथ्यन्ते (शास्त्री, इ.२०१५, पृ.२२०)। यथोक्तं कमलाकरेण–

**यदासन्नभावेन यस्योचितं हि निरुक्ताश्च तैस्तादृशास्तस्य भागाः ।**
**सदाऽस्तोदयारम्भकालोद्भवाः स्वे कुजोर्ध्वे सशुक्लेऽपि बिम्बेऽप्यधोऽर्के ॥**

(सिद्धान्ततत्त्वविवेकः, उदयास्ताधिकारः, श्लो. १३२)

कस्यापि ग्रहबिम्बस्य यैरंशैः सूर्यासन्नभावेन यदुदयास्तत्वमुचितं भवति तस्य तादृशा अस्तोदयारम्भकालोद्भवा अंशारेव कालांशा इति कथिताः । अर्थात् सूर्याद् यावताऽन्तरितो ग्रहोऽदृश्यो अथवास्तादृश्यश्च भवति तदन्तरं कालांशाः । कालांशाधिकान्तरिते सशुक्लेऽपि बिम्बे क्षितिजोर्ध्वे सति , तथा सूर्ये क्षितिजाधो वर्तमाने सति बिम्बं दृश्यं भवति (द्विवेदी, इ.१९९७, पृ.२१७) ।

सौरमते ग्रहकालांशा यथा–

**एकादशामरेज्यस्य तिथिसंख्यकाऽर्कजस्य च । अस्तांशा भूमिपुत्रस्य दश सप्ताऽधिकास्ततः ॥**
**पश्चादस्तमयोऽष्टाभिरुदयः प्राङ्महत्तया । प्रागस्त उदयः पश्चादल्पत्वाद्दशभिर्भृगोः ॥**
**एवं बुधो द्वादशभिश्चतुर्दशभिरंशकैः । वक्री शीघ्रगतिश्चार्कात् करोत्यस्तमयोदयौ ॥**

(सूर्यसिद्धान्तः, उदयास्ताधिकारः, श्लो. ६-८)

गुरोरुदयास्तकालांशा एकादश (११), शनैश्चरस्योदयास्तकालांशाः पञ्चदश (१५), मङ्गलस्योदयास्तकालांशाः सप्तदश (१७), शुक्रस्य नीचासन्ने विपुलबिम्बतया अष्टभिरंशैः (८) पश्चाद् अस्तमयः प्रागुदयश्च भवति । तथा उच्चासन्ने बिम्बस्याल्पत्वाद् दशभिरंशैः (१०), प्रागस्तः पश्चादुदयश्च भवति। अर्थात् शुक्रस्य पूर्वोदयकालांशा अष्ट (८), पूर्वास्तकालांशा दश (१०), पश्चिमोदयकालांशा दश (१०), पश्चिमास्तकालांशा अष्ट (८) । वक्री बुधो द्वादशभिः (१२) कालांशैः सूर्यादन्तरितोऽस्तमयोदयौ करोति। मार्गी बुधः सूर्याच्चतुर्दशभिरंशकैः (१४), कालांशैरन्तरितोऽस्तमयोदयौ करोति । अर्थाद् वक्रगतेर्बुधस्य यदा द्वादश (१२) कालांशा भवन्ति तदा सूर्यादधिकस्य पश्चादस्तमनं भवति । सूर्यादूनस्य प्रागुदयो भवति। मार्गगतेर्बुधस्य यदा कालांशाश्चतुर्दश (१४) तदा सूर्यादूनस्य प्रागस्तमनं सूर्यादधिकस्य पश्चादुदयश्च भवति। लघुबिम्बे ग्रहे सूर्यकिरणानामधिकः प्रभावो भवति चेन्महद्बिम्बे ग्रहे चाल्पप्रभावो भवति। अत एवोच्चासन्ने ग्रहबिम्बस्याल्पत्वात् कालांशा अधिकाः, नीचासन्ने च ग्रहबिम्बस्य विपुलत्वात् कालांशा अल्पा भवितुमर्हति। परञ्च भौमगुरुशनीनाम् अतिलघुबिम्बत्वाद् उच्चनीचस्थानयोरपि कालांशे भेदाभावमवलोकतया तेषामुदये अस्ते चैका एव कालांशाः पठिताः । बुधशुक्रयोस्तु बिम्बयोर्विपुलतया तयोर्वक्रत्वे (नीचासन्ने) द्विहीनाः कालांशा एवोचिताः (शास्त्री, इ.२०१५, पृ.२२१) । श्रीपतिमते ग्रहकालांशा यथा–

**शुक्रार्यज्ञद्युमणिजकुजा द्व्युत्तरैःकालभागैर्गोभिश्चन्द्रो रविभिरिनतो जायतेऽदृश्यदृश्यः ।**
**गम्यो न्यूनादसुचय इतश्चाधिकादन्तरस्थैर्युक्तः प्राणैः स खरसहृतः कालभागा भवेयुः ॥**
**मानाल्पत्वाद्दशभिरुदयं याति शुक्रः प्रतीच्यामंशैरस्तं दिशि सुरपतेः पीनभावात्तु मूर्तेः ।**
**पश्चादस्तं व्रजति वसुभिः प्रागुदेति ज्ञ एवं शक्रैः सूर्यैर्निगदितलवैश्चन्द्रभौमेज्यमन्दाः ॥**

(सिद्धान्तशेखरः, ग्रहोदयास्तमयाध्यायः, श्लो.८-९)

शुक्रगुरुबुधशनिकुजाः द्व्युत्तरवृद्धैर्नवभिः कालभागैः सूर्यसन्निधिवशेन दृश्या अदृश्याश्च भवन्ति । यथा शुक्रस्य कालांशा नव (९) । गुरोः ९ + २ = ११ । बुधस्य ११ + २ = १३ । शनेः १३ + २ = १५ । भौमस्य १५ + २ = १७ । एवमेव मार्गगतिशुक्रस्य = १०, वक्रगतिशुक्रस्य = ८, मार्गगतिबुधस्य = १४, वक्रगतिबुधस्य = १२ । चन्द्रः सूर्याद् द्वादशभिर्भागैः (१२) अदृश्यो दृश्यश्च जायते ।

भास्करमते ग्रहकालांशा यथा–

**दस्रेन्दवः शैलभुवश्च शक्रा रुद्राः खचन्द्रास्तिथयः क्रमेण ।**
**चन्द्रादितः काललवा निरुक्ता ज्ञशुक्रयोर्वक्रगयोर्द्विहीनाः ॥**

(सिद्धान्तशिरोमणिः, ग्रहोदयास्ताधिकारः, श्लो. ६)

चन्द्रादिग्रहाणां क्रमशः १२, १७, १४, ११, १०, १५ कालांशा भवन्ति। वक्रिणोर्बुधशुक्रयोस्तु द्विवर्जिता अर्थाद्वक्रिणो बुधस्य १२, वक्रिणः शुक्रस्य ८ कालांशा भवन्ति। षड्भिरंशैरेका घटिका भवति। सूर्यस्यास्तमयादुदयाद्वा घटिकाद्वयाधिकान्तरे चन्द्रो दृग्योग्यो भवति। तदूने सूर्यप्रभया आच्छादितत्वाद् अदृश्यो भवति। तेन चन्द्रस्य २ × ६ = १२ इति कालांशाः। एवं भौमस्य १७ अर्थात् षडंशोनास्तिस्रो घटिकाः। एवमन्येषां ग्रहाणां कालांशमानं बिम्बस्य स्थूलसूक्ष्मतावशेन न्यूनाधिकत्वं वर्तत इति गोलज्ञानां स्पष्टमेव। कमलाकरमते ग्रहकालांशा यथा–

**द्विसप्तवेदेन्दुखपञ्चभागा दिक्संयुताः काललवा निरुक्ताः ।**
**चन्द्रादिकानां भृगुसौम्ययोस्ते द्विहीनिता वक्रगयोः स्वतन्त्रैः ॥**
**इनार्धबिम्बास्तमनादपूर्वशुक्लं नृदृश्यं मृगलाञ्छनस्य ।**
**स्याद्येन कालेन च तस्य ते स्युः कालांशका यावदिनं दृगिन्दोः ॥**

(सिद्धान्ततत्त्वविवेकः, उदयास्ताधिकारः, श्लो.१३८-१३९)

चन्द्रादिग्रहाणां कालांशाः क्रमेण दिक्संयुता द्विसप्तवेदेन्दुखपञ्चभागा भवन्ति। अर्थाच्चन्द्रस्य २ + १० = १२ कालांशाः। भौमस्य ७ +१० = १७। बुधस्य ४ + १० = १४। गुरोः १ + १० = ११। शुक्रस्य ० + १० = १०। शनेः ५ + १० = १५। वक्रगयोः शुक्रबुधयोस्तु द्विहीनाः कालांशा अर्थाद्वक्रगतेः शुक्रस्य १० - २ = ८, वक्रगतेर्बुधस्य १४ - २ = १२। सूर्यार्धबिम्बास्तमनाच्चन्द्रस्यापूर्वशुक्लं येन कालेन च नृदृश्यं भवेत्तस्य दृगिन्दोः सूर्यं यावत्ते कालांशा भवन्ति।

## तालिकायां ग्रहकालांशाः

| ग्रहाणाम् | कालांशाः |
|---|---|
| चन्द्रस्य | १२ |
| भौमस्य | १७ |
| वक्रिणो बुधस्य | १२ |
| मार्गिणो बुधस्य | १४ |
| बृहस्पतेः | ११ |
| वक्रिणः शुक्रस्य | ८ |
| मार्गिणः शुक्रस्य | १० |
| शनैश्चरस्य | १५ |

इत्थं ग्रहाणां कालांशविषये सूर्यसिद्धान्तः, सिद्धान्तशेखरः, सिद्धान्तशिरोमणिः, सिद्धान्ततत्त्वविवेकः, इतिग्रन्थेषु समानता दृश्यते।

## (ग) ग्रहकालांशानां प्रयोजनम्

सूर्याद् यावन्मितेऽन्तरांशे स्थितो ग्रहोऽदृश्यतां गच्छति ते तस्य ग्रहस्य कालांशा भवन्ति। अतो ग्रहस्येष्टकालांशा यदि पठितकालांशेभ्योऽधिका भवन्ति तदा सूर्येण सहान्तरस्याधिक्यात्तस्य दर्शनं भवति। यदि ग्रहस्य पठितकालांशेभ्य इष्टकालांशा न्यूना भवन्ति तदा रविणा सहान्तरस्याल्पत्वात्तस्यादर्शनं भवति। इत्थं सूर्यासन्नभावेन ग्रहाणामुदयास्तज्ञानाय कालांशानां प्रयोजनं वर्तते (मिश्रः, वि.स.२०८०, पृ.२६४)। यथोक्तञ्च सूर्यसिद्धान्ते–

**एभ्योऽधिकैः कालभागैर्दृश्या न्यूनैरदर्शनाः।**
**भवन्ति लोके खचरा भानुभाग्रस्तमूर्तयः॥** (सूर्यसिद्धान्तः, उदयास्ताधिकारः, श्लो.९)

एवमेव सिद्धान्ततत्त्वविवेकेऽपि–

**यदा प्रोक्ताधिकैः कालभागैरर्कात्स्वदृग्ग्रहः।**
**तदा बिम्बं नृदृश्यं स्यादल्पैस्तैर्न कथञ्चन॥** (सिद्धान्ततत्त्वविवेकः, उदयास्ताधिकारः,श्लो.१४०)

यदा सूर्यात् पठिताधिककालांशैः स्वदृग्ग्रहोऽन्तरितो भवति तदा तस्य ग्रहस्य बिम्बं नृदृश्यं भवति। अर्थाद् ग्रहोदयो भवति। अन्यथा ग्रहास्तो भवति अर्थाद् यदा सूर्यात् पठितकालांशात् स्वल्पकालांशैः स्वदृग्ग्रहोऽन्तरितो भवति तदा तस्य ग्रहस्य बिम्बं नृदृश्यं न भवति। तेन तदा ग्रहास्तो भवति।

## (घ) सूर्यासन्नभावेन ग्रहाणामुदयास्तदिग्ज्ञानम्

पञ्चताराग्रहेषु गुरुभौमशनैश्चराः सूर्यादल्पगतिका वर्तन्ते। एते ग्रहा मार्गिणो वक्रिणो वा यदा सूर्याद् अग्रतो भवन्ति तदा तेषां गतीनाम् अल्पत्वादनुदिनं सूर्येण सहान्तरस्य ह्रासाद् दिनान्ते स्वकालांशाल्पेऽन्तरे पश्चिमदिशि अस्तमनं भवति। ते ग्रहा अस्तमनाद् यदा सूर्यतः पृष्ठगता भवन्ति तदाऽधिकगतेः सूर्यात्तेषाम् अनुदिनमन्तरस्योपचयात्कालांशाभ्यधिकेऽन्तरे जाते रात्रिशेषे सूर्योदयात्प्रागेव पूर्वदिशि तेषामुदयो भवति। सूर्यादधिकगती बुधशुक्रौ वक्रिणौ यदा सूर्यादग्रगतौ भवतस्तदा वक्रत्वेन अनुदिनमन्तरस्यापचयात् कालांशाल्पेऽन्तरे तयोः प्रतीच्यामस्तमनम्। सूर्यात् पृष्ठस्थयोस्तयोर्वक्रिणोरनुदिनं पृष्ठाभिमुखान्तरस्योपचयात्कालांशाधिकेऽन्तरे जाते प्रागुदयो भवति। सूर्यादधिकगतिकाश्चन्द्रज्ञशुक्रा मार्गिणो यदा सूर्यात् पृष्ठस्था भवन्ति तदा तेषां गतीनामाधिक्यात् प्रतिदिनं सूर्येण सहान्तरस्यापचयात् प्रागेवास्तमनं भवति। तथाऽस्तानन्तरं यदा ते सूर्यादग्रस्था भवन्ति तदा कालांशाधिकेऽन्तरे जाते दिनान्ते प्रतीच्यामुदयश्च भवति (शास्त्री, इ.२०१५, पृ.२१८)। यथोक्तञ्च सूर्यसिद्धान्ते–

**सूर्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः। ऊनाः प्रागुदयं यान्ति ज्ञशुक्रौ वक्रिणौ तथा॥**
**ऊना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः। व्रजन्त्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः॥**
(सूर्यसिद्धान्तः, उदयास्ताधिकारः, श्लो.२-३)

एवमेव सिद्धान्तशेखरग्रन्थे–

**ऊनो ह्यूनगतिः सहस्रकिरणाद् दृश्यो भवेत् प्राग्ग्रहः**
**पश्चादभ्यधिकस्तथाऽधिकगतिः स्यात् प्रागदृश्यः पुनः।**
**स्वल्पोऽनल्पगतिस्तथोनगतिकः पश्चाददृश्योऽधिकः**
**कालांशैरधिकोनकस्तु कथितैर्दृक्कर्मणा संस्कृतः॥**
**प्राच्यां दृश्या भौमजीवार्कपुत्रास्ते चादृश्याः सर्वदा स्युः प्रतीच्याम्।**
**वक्रं प्राप्तौ चन्द्रपुत्रासुरेज्यौ मार्गस्थौ तौ चन्द्रमा व्यत्ययेन॥**
(सिद्धान्तशेखरः, ग्रहोदयास्तमयाध्यायः, श्लो.२–३)

सूर्यादल्पगतिको ग्रहः कालांशैरधिकः पूर्वस्यां दिशि दृश्यो भवेत्तथा सूर्यादधिकगतिको ग्रहः कलांशैरभ्यधिकः पश्चिमायां दिशि दृश्यो भवेत् । पुनः स अनल्पगतिको ग्रहः कालांशैः स्वल्पो पूर्वस्यां दिशि अदृश्यो भवति तथा अल्पगतिको ग्रहः कालांशैर्न्यूनः पश्चिमायां दिशि अदृश्यो भवति (शर्मा, इ.२०२३, पृ.४२४)। एवमेव सिद्धान्तशिरोमणौ–

**निरुक्तौ ग्रहस्येति नित्योदयास्ताविनासन्नभावेन यौ तौ च वक्ष्ये ।**

**रवेरूनभुक्तिर्ग्रहः प्रागुदेति प्रतीच्यामसावस्तमेत्यन्यथान्यः ॥४॥**

(सिद्धान्तशिरोमणिः, ग्रहोदयास्ताधिकारः,श्लो.४)

सूर्यगतितोऽधिकगतिमन्तो ग्रहाः पश्चिमक्षितिजे उद्गच्छन्ति, पूर्वक्षितिजे च अस्तं यान्ति । सूर्यगतितो न्यूनगतिमन्तो ग्रहाः पूर्वक्षितिजे उद्गच्छन्ति, पश्चिमे चास्तं यान्ति । एवमेव सिद्धान्ततत्त्वविवेकग्रन्थे–

**अर्काल्पकत्वे मृदुखेचरस्य पूर्वोदयश्चास्तमयः प्रतीच्याम् ।**
**अर्काधिकत्वे त्वथ शीघ्रगस्य सूर्याल्पकत्वेऽस्तमयोऽस्ति चैन्द्र्याम् ॥**

**अर्काधिकत्वेऽभ्युदयः प्रतीच्यामित्थं तदेकावगमः स्वकालात् ।**

(सिद्धान्ततत्त्वविवेकः, उदयास्ताधिकारः, श्लो.१६४)

सूर्याद् अल्पगतिग्रहो यदि सूर्यादेव पृष्ठतः (पश्चिमायां दिशि) भवति तदा प्रतिदिनं तयोरन्तरस्योत्तरोत्तरमधिकत्वाद् यदि कस्मिन्नपि पूर्वरात्रिभागे तदन्तरं कालांशसमं भवेत्तदा रात्र्यन्ते प्रवहगत्या सूर्योदयात्पूर्वमेव तस्योदयसंभवादुदयो भवति। सूर्यादग्रतः (पूर्वस्यां दिशि) वर्तमानस्य अल्पगतिग्रहस्योत्तरोत्तरं तदन्तरांशक्षीयमाणाद्यदि सूर्यात् कालांशतुल्यो-ऽन्तरितस्तदा सूर्ये क्षितजस्थे वा अस्तक्षितिजादधःस्थे स ग्रहः पश्चिमदिशि अस्तमयो भवति। सूर्यादधिकगतिर्ग्रहो यदि सूर्यादेव पृष्ठतः (पश्चिमदिशि) भवति तदा रविणा सह तस्यान्तरांशानामुत्तरोत्तरमल्पात्वाद्रात्र्यादौ पश्चिमक्षितिजाधो-गत्वात्तदानीं बिम्बदर्शनाभावाद्रात्र्यन्ते सूर्योदयात्प्रागेव पूर्वक्षितिजादूर्ध्वगमनसम्भवाद्यदा तयोरन्तरं कलांशसमं तदा पूर्वस्यां दिशि शीघ्रगतिग्रहस्यास्तमयो भवति। सूर्यादधिकत्वे सति तस्य सूर्येण सहोत्तरोत्तरं तदन्तरांशानामुपचयसम्भवाद्रवेः पूर्वभागस्थितत्वाच्च सूर्ये अस्तक्षितिजस्थे च शीघ्रगतिग्रहोऽस्तक्षितिजोर्ध्वस्थो भवति। तत्र यावत्तयोरन्तरं कालांशाल्पं तावददर्शनं, यदा तदन्तरांशाः कालांशाधिकास्तदा तदस्तक्षितिजासन्नप्रदेशे एव तस्योदयो भवति (द्विवेदी, इ.१९९७, पृ,२२५)।

भौमबृहस्पतिशनिग्रहा वक्रिणौ बुधशुक्रौ च पूर्वदिशि रात्रिशेषे दृश्याः (उदिताः) भवन्ति । ते च सर्वदा पश्चिमदिशि सायङ्काले अदृश्याः (अस्तङ्गताः) भवन्ति। मार्गस्थौ बुधशुक्रौ चन्द्रमा च पश्चिमदिशि सायङ्काले दृश्याः (उदिताः) भवन्ति चेत् पूर्वदिशि रात्रिशेषे अदृश्याः (अस्तङ्गताः) भवन्ति (शर्मा, इ.२०२३, पृ.४२६)। यथोक्तञ्च–

**ज्ञशुक्रावृजू प्रत्युद्गम्य वक्रां गतिं प्राप्य तत्रैव यातः प्रतिष्ठाम् ।**

**ततः प्राक् समुद्गम्य वक्रावृजुत्वं समासाद्य तत्रैव चास्तं व्रजेताम् ॥**

(सिद्धान्तशिरोमणिः, ग्रहोदयास्ताधिकारः, श्लो.५)

**तालिकायां ग्रहाणामुदयास्तदिशः**

| ग्रहाणाम् | उदयदिशः | अस्तदिशः |
|---|---|---|
| चन्द्रस्य | पश्चिमः | पूर्वः |
| भौमस्य | पूर्वः | पश्चिमः |
| मार्गगतिबुधस्य | पश्चिमः | पूर्वः |
| वक्रगतिबुधस्य | पूर्वः | पश्चिमः |
| बृहस्पतेः | पूर्वः | पश्चिमः |
| मार्गगतिशुक्रस्य | पश्चिमः | पूर्वः |
| वक्रगतिशुक्रस्य | पूर्वः | पश्चिमः |
| शनैश्चरस्य | पूर्वः | पश्चिमः |

इत्थं ग्रहाणां सूर्यसन्निधिवशेनोदयास्तयोर्दिश अपि समाना एव कथिता वर्तन्ते सिद्धान्तज्योतिषग्रन्थेषु । तत्र पूर्वदिशि सूर्योदयात् पूर्वमेव ग्रहाणामुदयास्तं, पश्चिमदिशि सूर्यास्तात् पश्चादेव ग्रहाणामुदयास्तं भवति ।

**(ङ) अभीष्टसमये ग्रहोदयास्तयोर्गतैष्यदिनादिसाधनम्**

अभीष्टदिनेऽभीष्टग्रहस्योदयास्तकालांशसाधनार्थं पश्चिमदिशि सूर्यास्तकालिकौ, पूर्वदिशि तु उदयकालिकौ स्पष्टसूर्यः, स्पष्टग्रहश्च साधनीयौ । ततः स्पष्टग्रहे आयनदृक्कर्म, आक्षदृक्कर्म च देयम् । एवं कृते ग्रहबिम्बस्योदयकालेऽस्त-काले वा स्फुटलग्नं भवति । तदनु दृक्कर्मसंस्कृतग्रहरूपलग्नात् सूर्यान्तं यावद् येऽसवस्ते षष्टिभाजितास्तदा प्राच्यां दिशीष्ट-कालांशा भवन्ति। षड्राशियुतौ यौ दृक्कर्मसंस्कृतोदयग्रहार्कौ तयोर्ये अन्तरासवस्ते षष्टिभाजितास्तदा पश्चिम-दिशीष्टकालांशा भवन्ति । इत्थं ग्रहाणामभीष्टकालांशाः साधनीयाः (मिश्रः, वि.सं २०८०, पृ.२६२) ।

ग्रहाणां कालांशाः कालसम्बन्धिनोऽतस्ते नाडीवृत्तीया भवन्ति। अतः पठितेष्टकालांशयोरन्तरं नाडीवृत्तीयं भवति । अतः क्रान्तिवृत्तीयग्रहगतिकलानां नाडीवृत्तीयकरणार्थमनुपातः–

एकस्मिन् राशौ १८०० कलाः भवन्ति। अतो यदि १८०० कलाभिः कालवृत्ते ग्रहार्कनिष्ठराश्युदयासवो लभ्यन्ते तदा स्वस्वगतिकलाभिः किमिति फलम्?

$$\text{नाडीवृत्ते स्वस्वगती} = \frac{\text{ग्रहार्कनिष्ठराश्युदयासवः} \times \text{ग्रहगतिः}}{१८००}$$

एकस्मिन् दिने मार्गग्रहयोरन्तरं गत्यन्तरसमं वक्रगत्योस्तु गतियोगसममन्तरं भवेत् । अतोऽनुपातः–

यदि कालात्मकेन ग्रहार्कयोः गत्यन्तरेण गतियोगेन वैकं दिनं तदा पठितेष्टकालांशान्तरेण किमित्यनुपातेन–

$$\text{गतैष्यं दिनादि} = \frac{१ \times \text{पठितकालांशाः} \sim \text{इष्टकालांशाः}}{\text{गत्यन्तरं वा गतियोगः}}$$

अभीष्टकालांशेभ्यः पठितकालांशानां न्यूनाधिक्ये क्रमेणोदये गतैष्यं वाच्यम् अर्थाद् यदि अभीष्टकालांशेभ्यः पठित-कालांशा न्यूना भवन्ति तदा ग्रहस्योदयो गतः (ग्रहोदयो वर्तते)। यदि अभीष्टकालांशेभ्यः पठितकालांशा अधिकास्तदा ग्रहस्योदयो भविष्यति (ग्रहास्तो वर्तते)। तथाभीष्टकालांशानां पठितकालांशेभ्यो न्यूनाधिक्ये अस्ते क्रमेण गतैष्यं ज्ञेयमर्थात् पठितकालांशेभ्यः अभीष्टकालांशा न्यूनास्तदा ग्रहस्यास्तो गतः (ग्रहास्तो वर्तते)। यदि पठितकालांशेभ्योऽभीष्टकालांशा अधिकास्तदा ग्रहस्योस्तो भविष्यति (ग्रहोदयो वर्तते)। यथोक्तञ्च सूर्यसिद्धान्ते–

**तत्कालांशान्तरकला भुक्त्यन्तरविभाजिताः। दिनादि तत्फलं लब्धं भुक्तियोगेन वक्रिणः॥**

**तल्लग्नासुहते भुक्ती अष्टादशशतोद्धृते। स्यातां कालगती ताभ्यां दिनादि गतगम्ययोः॥**

(सूर्यसिद्धान्तः, उदयास्ताधिकारः,श्लो.१०-११)

सिद्धान्तशिरोमणौ यथा–

**उक्तेभ्य ऊनाभ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यात्॥**

**अतोऽन्यथा वास्तमयोऽवगम्यः प्रोक्तेष्टकालांशवियोगलिप्ताः।**

**खाभ्राष्टभूघ्ना द्युचरोदयाप्ताः खेटार्कभुक्त्यन्तरभाजिताश्च॥**

**वक्रे तु भुक्त्यैक्यहृता अवाप्तास्तदन्तराले दिवसा गतैष्याः।**

**तात्कालिकाभ्यां रविदृग्ग्रहाभ्यां मुहुः कृतास्ते स्फुटतां प्रयान्ति॥**

(सिद्धान्तशिरोमणिः, ग्रहोदयास्ताधिकारः, श्लो.८-१०)

इष्टकालांशा यदि पठितकालांशेभ्यः स्वल्पा भवन्ति तदा ग्रहस्योदयो गम्यो भवति। यदि इष्टकालांशाः पठित-कालांशेभ्योऽधिका भवन्ति तदा ग्रहस्योदयो गतो भवति। अतोऽन्यथास्तमयो भवति। पठितकालांशेभ्यो यदि इष्टकालांशाः स्वल्पास्तदा ग्रहस्यास्तमयो गतो भवति। यदि पठितकालांशेभ्य इष्टकालांशा अधिकास्तदा ग्रहस्यास्तमयो गम्यो भवति। अतः पठितकालांशानामिष्टकालांशानाञ्चान्तरं कार्यम्। तत्र याः कला भवन्ति ताः कला अष्टदशशतैर्गुण्या दृग्ग्रहाक्रान्तस्य राशेः स्वेदेशोदयासुभिर्भाज्याः। प्राप्तफलकलानां तु यदि ग्रहो मार्गी भवेत्तदा ग्रहार्कगत्यन्तरेण, यदि ग्रहो वक्री भवेत्तदा ग्रहार्कगतियोगेन भागो विधेयः। यल्लब्धं ते गतदिवसा एष्यदिवसा वा भवन्ति ग्रहस्योदयेऽस्तमये वा। तैर्दिवसैस्तात्कालिकौ दृग्ग्रहार्कौ कृत्वा एवमसकृत्कर्मणा सम्यक् तत्कालज्ञानं भवति (शर्मा, इ.२०२३, पृ.४३०)।

**प्राग्दृग्ग्रहश्चेदधिको रवेः स्यादूनोऽथवा पश्चिमदृग्ग्रहश्च।**
**प्रोक्तेष्टकालांशयुतेः कलाभिः साध्यास्तदानीं दिवसा गतैष्याः॥**

**तथा यदीष्टकालांशाः प्रोक्तेभ्योऽभ्यधिकास्तदा।**
**व्यत्ययश्च गतैष्यत्वे ज्ञेयोऽह्नां सुधिया खलु॥**

(सिद्धान्तशिरोमणिः, ग्रहोदयास्ताधिकारः, श्लो.११-१२)

यदि प्राग्दृग्ग्रहो सूर्यादधिको भवति अथवा पश्चिमदृग्ग्रहो न्यूनो भवति तदा ये इष्टकालांशा आनीतास्तेषां पठितकालांशानां च योगकलाभिर्दिवसाः साधनीयाः। तथा प्राग्दृग्ग्रहेऽर्कादधिके सति पश्चाद्दृग्ग्रहे न्यूने वा सति ये इष्टकालांशा आगतास्ते च यदि पठितकालांशेभ्योऽधिका भवन्ति तदा पठितेष्टकालांशयुतेः कलाभिर्ये दिवसाः साधितास्तेषां दिवसानां यातैष्यत्वे विपर्ययो भवति (शर्मा, इ.२०२३, पृ.४३२)।

**(च) ग्रहाणां कालांशसम्बन्धिघटिकाज्ञानम्**

सूर्यसमीपगानां शुक्रगुरुबुधशनिभौमानां क्रमात् सार्धघट्या, त्रिलववर्धितया (उत्तरोतरं घटीत्र्यंशसहितया) अस्तमयोदयौ भवतः। अर्थात् प्राक्क्षितिजे यस्मिन् दिने ग्रहोदयानन्तरं उक्तघट्या सूर्यस्य उदयस्तस्मिन् दिने ग्रहो रात्रिशेषे अदृश्यो दृश्यश्च भवति। एवं यस्मिन् दिने पश्चिमक्षितिजे रव्यस्तानन्तरम् उक्तघट्या ग्रहस्यास्तमयस्तस्मिन् दिने सायङ्काले ग्रहोऽदृश्यो दृश्यश्च भवति। यथा शुक्रस्य घटीप्रमाणाम् $१+\frac{१}{२}=\frac{३}{२}$। गुरोः $\frac{३}{२}+\frac{१}{३}=\frac{११}{६}$। बुधस्य $\frac{११}{६}+\frac{१}{३}=\frac{१३}{६}$। शनेः $\frac{१३}{६}+\frac{१}{३}=\frac{१५}{६}$। भौमस्य $\frac{१५}{६}+\frac{१}{३}=\frac{१७}{६}$। चन्द्रः सूर्योदयास्तकालात् द्वाभ्यां घटीभ्यां पुरतः परतो वा यदि उदेति अस्तमेति वा तदा अदृश्यदृश्यतामुपैति (मिश्रः, वि.स.१९८९, पृ.४३३)। षड्भक्ताः पठितकालांशाः कालांशघट्यो भवन्तीति गोलज्ञानां स्पष्टमेव। यथोक्तञ्च श्रीपतिना–

**सितसुरेज्यबुधार्कसुतासृजां सवितृमण्डलसन्निधिवर्तिनाम्।**

**घटिकयाऽर्धसमन्वितया क्रमात् त्रिलववर्धितयास्तमयोदयौ॥**

**कुमुद्वतीपतिः पुनर्घटीद्वयान्तरस्थितः। सहस्ररश्मिमण्डलादुपैत्यदृश्यदृश्यताम्॥**

(ग्रहोदयास्तमयाध्यायः, सिद्धान्तशेखरः, श्लो.१२-१३)

**(छ) ग्रहास्तसमये वर्ज्यकर्माणि**

मुहूर्तशास्त्रे गुरुशुक्रयोरस्तसमये विविधानि शुभकर्माणि न करणीयानीति कथितं वर्तते। तद्यथा–

**वाप्यारामतडागकूपभवनारम्भप्रतिष्ठे व्रताऽऽरम्भोत्सर्गवधूप्रवेशनमहादानानि सोमाष्टके।**

**गोदानाग्रयणप्रपाप्रथमकोपाकर्म वेदव्रतं नीलोद्वाहमथातिपन्नशिशुसंस्कारान् सुरस्थापनम्॥**

**दीक्षामौञ्जिविवाहमुण्डनमपूर्वदेवतीर्थेक्षणं सन्न्यासाग्निपरिग्रहो नृपतिसन्दर्शाभिषेकौ गमम्।**

**चातुर्मास्यसमावृती श्रवणयोर्वेधं परीक्षां त्यजेद्वृद्धत्वास्तशिशुत्व इज्यसितयोर्न्यूनाधिमासे तथा॥**

(मुहूर्तचिन्तामणिः, शुभाशुभप्रकारणम्, श्लो. ४६-४७)

वापी, उपवनम्, तडागः, कूपः, भवनमेतेषामारम्भप्रतिष्ठे, व्रतानां प्रारम्भ उद्यापनश्च, वधूप्रवेशनम्, महादानानि, सोमयागः, अष्टकाश्राद्धम्, केशान्तसंस्कारः, आग्रयणम्(नवान्नेष्टिः), जलशालाया निर्माणारम्भः प्रतिष्ठा च, प्रथमोपाकर्म, वेदव्रतम्, काम्यो वृषोत्सर्गः, देवताप्रतिष्ठा, अतिपन्नशिशुसंस्काराः, दीक्षा, मौञ्जीबन्धनम्(व्रतबन्धसंस्कारः), विवाहः, मुण्डनम्, अपूर्वदेवदर्शनम्, अपूर्वतीर्थगमनम्, सन्न्यासः, अग्निपरिग्रहः, महीपतिदर्शनम्, राजाभिषेकः, यात्रा, चातुर्मास्य-व्रतम्, समावर्तनकर्म, कर्णवेधः, दिव्यपरीक्षैतानि कार्याणि गुरुशुक्रयोरस्तमयत्वे वृद्धत्वे बाल्यत्वे क्षयमासे अधिमासे च वर्ज्यानि (निरौला, वि.स.२०८१, पृ.४६)। एवमेव–

**गीवार्णाऽम्बुप्रतिष्ठापरिणयदहनाधानगेहप्रवेशाश्चौलं राजाभिषेको व्रतमपि शुभदं नैव याम्यायने स्यात्।**

**नो वा बाल्यास्तवार्द्धे सुरगुरुसितयोर्नैव केतूदये स्यात् पक्षं वार्द्धं च केचिज्जहाति तमपरे यावदीक्षां तदुग्रे॥२६॥**

(मुहूर्तचिन्तामणिः, संस्कारप्रकरणम्, श्लो.२६)

देवतायाः प्रतिष्ठा, जलशायाः प्रतिष्ठा (आरम्भः), विवाहः, अग्न्याधानकर्म, गृहप्रवेशः, चूडाकरणम्, राज्या-भिषेकः, व्रतादीनामारम्भश्चेतानि कार्याणि सूर्ये उत्तरायणे गते शुभफलदानि भवन्ति, न तु दक्षिणायने, गुरुशुक्रयोर्बाल्यत्वे

वृद्धत्वे अस्तमयत्वे, केतूदये च। केतूदयन्तु केचन पक्षं यावत् (१५ दिनं यावत्), अर्धमर्थादष्टमदिनं यावत्, उदयं यावद्वा शुभकर्मणि त्यजन्ति (निरौला, वि.स.२०८१, पृ.२१९)। एवमेव–

**गर्भाद्यन्नाशनान्तेषु न गुरुसितयोर्बाल्यवार्ध्ये च मौढ्यं**
**जह्यात्कालस्य रोधाद्धरिगुरुमयनं याम्यमूनाधिमासौ।**
**एतच्चौलादिषूज्झेदथ गुरुसितयोर्बाल्यवार्ध्ये नगाहे**
**चाथो शाखेशमौढ्ये व्रतमपि निगमारम्भमार्यो न कुर्यात्॥** (मुहूर्तमार्तण्डः, संस्कारप्रकरणम्, श्लो.९)

कालस्य रोधाद् गर्भाधानाद्यन्नप्राशनान्तेषु कर्मसु (गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम् एतेषु सप्तसंस्कारेषु) गुरुशुक्रयोर्बाल्यत्वम्, वृद्धत्वम्, अस्तमयत्वम्, सिंहस्थगुरुम्, याम्यायनम्, न्यूनाधिमासौ न त्यजेत्। गुरुशुक्रयोरस्तादिकं चूडादिषु कर्मसु (चूडाकरणम्, उपनयनम्, वेदारम्भः, केशान्तः, समावर्तनम्, विवाहः, एतेषु नवसंस्कारेषु) त्यजेत्। एवमेव स्वशाखेशस्य (ऋग्वेदस्याधिपो गुरुः, यजुर्वेदाधिपः शुक्रः, सामवेदाधिपो भौमः, अथर्ववेदाधिपो बुधः एतेषाम्) अस्तमयत्वे च उपनयनम्, वेदारम्भश्च न करणीयः (मिश्रः, इ. २०२३, पृ.३८)।

## निष्कर्षः

कालबोधकं ज्योतिषशास्त्रं वर्तते। ज्योतिषशास्त्रस्य सिद्धान्तस्कन्धे कालगणानासु ग्रहाणामुदयास्तविषयो-ऽप्यन्यतमः। सूर्यसिद्धान्तः, सिद्धान्तशेखरः, सिद्धान्तशिरोमणिः, सिद्धान्ततत्त्वविवेकः, इत्यादिसिद्धान्तज्योतिषग्रन्थेषु ग्रहो-दयास्तगणनाविधिः प्रदिष्टः। अत्र सिद्धान्तज्योतिषग्रन्थानां पर्यालोचनया ग्रहाणामुदयास्तसाधनविधेरध्ययनं विहितमस्ति। सूर्यपेक्षया प्रकाशरहितानां चन्द्रादिग्रहाणां सूर्यसान्निध्यात्तस्य प्रखरकिरणप्रभावेण यददर्शनं भवति तत्तेषामस्तमयत्वम्। एवमेव सूर्यादन्तरितानां ग्रहाणां तस्य प्रखरकिरणस्याल्पप्रभावेण यद्दर्शनं तत्तेषामुदयत्वम्। सूर्यसन्निधिवशेन ग्रहाणामुदयास्तदिग्ज्ञाने, ग्रहकालांशमानकथने प्राचीनाचार्याणां मतैक्यं दृश्यते। उदयास्तसाधनविधावपि समानता एवास्ति। तत्र दृक्कर्मसंस्कृतग्रहवशादेवोदयास्तकालः साधनीयो भवति। अभीष्टकाले सूर्यग्रहयोः कालवृत्तीयान्तरांशं (इष्टकालांशं) विज्ञाय अनुपातविधिना ग्रहोदयास्तयोः कालसाधनविधिः प्रतिपादितो वर्तते सिद्धान्तज्योतिषग्रन्थेषु। भौमबुधगुरुशुक्रशनैश्चरेषु पञ्चताराग्रहेषु गुरुशुक्रयोः सूर्यसन्निधिवशेनास्तमनं कालाशुद्धिरिति मुहूर्तज्ञानां पौराणिकाना-ञ्चाभिमतमस्ति। कालाशुद्धौ विहितानि काम्यकार्याणि फलरहितानि विपरीतफलदायकानि वा भवन्ति। मुहूर्तशास्त्रे नित्यकार्याणि, कालानुरोधात् कथितानि नामकरणादिनैमित्तिककार्याणि कालाशुद्धावपि न निषिद्धानि। अन्यानि व्रतबन्ध-विवाहादिकाम्यकार्याणि तु कालाशुद्धौ निषेधितानि वर्तन्ते।

## सन्दर्भसामग्रीसूची


आचार्यः, भास्करः. (इ.२०२३). *सिद्धान्तशिरोमणिः*. सत्यदेवशर्मा (सम्पा.). चौखम्बा सुरभारती प्रकाशन।

नारायणदैवज्ञः. (इ.२०२३). *मुहूर्तमार्त्तण्डः*. सत्येन्द्रमिश्रः (सम्पा.). चौखम्बा कृष्णदास अकादमी।

भट्टः, कमलाकरः. (इ.१९९७). *सिद्धान्ततत्त्वविवेकः*.(द्वितीयो भागः) कृष्णचन्द्रद्विवेदी (सम्पा.). चौखम्बा सुरभारती प्रकाशन।

मिश्रः, सत्येन्द्रः. (सम्पा.). (वि.सं. २०८०). *सूर्यसिद्धान्तः*.चौखम्बा संस्कृत भवन।

रामदैवज्ञः. (वि.सं.२०८१). *मुहूर्त्तचिन्तामणिः*. नारायणप्रसादनिरौला (सम्पा.). काष्ठमण्डप पुस्तक स्टोर।

शास्त्री, कपिलेश्वरः. (सम्पा.). (इ.२०१५). *सूर्यसिद्धान्तः*. चौखम्बा संस्कृत भवन।

श्रीपतिभट्टः. (वि.सं.१९८९). *सिद्धान्तशेखरः*. श्रीबबुआजिमिश्रः (सम्पा.). कलिकाताविश्वविद्यालयस्थमुद्रणालयः।